## दुहः कब् घश्च । (७०/२९७९)

दुहेर्धातोः सुप्युपपदे कप् प्रत्ययो भवति, घकारश्चान्तादेशः । कामदुघा धेनुः । [1]अर्घदुघा । धर्मदुघा ॥

## मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । (७१/३४१४)

श्वेतवह उक्थशस् पुरोडाश् इत्येतेभ्यो ण्विन् प्रत्ययो भवति [2]मन्त्रे विषये । धातूपपदसमुदाया निपात्यन्ते अलाक्षणिककार्यसिद्धयर्थम् । प्रत्ययस्तु[3] विधीयत [4]एव । श्वेतशब्दे कर्तृवाचिनि उपपदे वहेर्धातोः कर्मणि कारके ण्विन् प्रत्ययो भवति । श्वेता एनं वहन्ति [5]श्वेतवा इन्द्रः । उक्थशब्दे कर्मणि करणे [6]वा उपपदे [7]शंसतेर्धातोः ण्विन् प्रत्ययो भवति, [8]नलोपश्च [9]निपात्यते । उक्थानि शंसति, उक्थैर्वा शंसति, उक्थशा यजमानः (ऋ. ४.२.१६) । 'दाशृ दाने' (धा.पा. ८८२) इत्येतस्य पुरःपूर्वस्य डत्वम्, कर्मणि च [10]प्रत्ययः । पुरो दाशन्त एनं[11] पुरोडाः (ऋ. ३.२८.२) ।

[२६३] श्वेतवहादीनां डस्पदस्येति वक्तव्यम् । (म. भा. २.१०८)

श्वेतवोभ्याम् । श्वेतवोभिः । पदस्य इति किम् ? श्वेतवाहौ । श्वेतवाहः ॥

## अवे यजः । (७२/३४१५)

अवे उपपदे यजेः धातोः ण्विन् प्रत्ययो भवति [12]मन्त्रे विषये । 'त्वं[13] यज्ञे [14]वरुणस्यावया असि' (काठ.सं. ३५.६५) । योगविभाग उत्तरार्थः ॥

## विजुपे छन्दसि । (७३/३४१७)

उपे उपपदे यजेः[15]छन्दसि विषये विच् प्रत्ययो भवति । उपयड्भिरूर्ध्वं [16]वहन्ति । [17]उपयट्त्वम् । छन्दोग्रहणं [18]ब्राह्मणार्थम् । विचः चित्करणं सामान्यग्रहणा[19]विघातार्थम् 'वेरपृक्तस्य' (६.१.६७/३७५) इति । किमर्थ[20]मिदमुच्यते, यावता 'अन्येभ्योऽपि दृश्यन्ते' (३.२.७५/२९८०) इति यजेरपि [21]विच् सिद्ध [22]एव? [23]यजेर्नियमार्थमेतत्, उपयजेः छन्दस्येव, [24]न भाषायाम् इति ॥

---

1. अर्घदुघा नास्ति ब, कर्मदुघा अ, चर्मदुघा ब. 2. मन्त्रविषये अ, तन्त्रविषये ब. 3. तु नास्ति अ. 4. एव नास्ति फ. 5. इति इत्यधिकम् फ. ह. 6. च क. 7. शंसतेः नास्ति फ, धातोः नास्ति ब. क. ह. 8. नकारलोपः अ. ह. 9. निपात्यते नास्ति क. फ. ह. 10. ण्विन् प्रत्ययो भवति ह. 11. इति इत्यधिकम् फ, पुरोडाश् ह. 12. मन्त्रविषये ब. क. फ. 13. हि इत्यधिकम् क. 14. वारुणस्य ह. 15. धातोः इत्यधिकम् फ. 16. यजन्ति अ, उपवहन्ति फ, रुद्रं वहन्ति तदुपयजः ह. 17. तद् उपयजां उपयत्त्वम् ब. क. ड, उपपदत्वं छन्दोग्रहणं क.ह. 18. उत्तरार्थम् ड. 19. °विघातार्थः ह. 20. पुनरिदं ह. 21. इत्थं सिद्धं फ. 22. एव नास्ति अ. क. ह. 23. यजेः नास्ति ब. क. 24. न भाषायाम् नास्ति ह.